श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसुरपुरं वेङ्कटाचार्य विरचितं

# ॥ श्री यतिराजदण्डकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री यतिराजदण्डकम् ॥

नमस्त्रैय्यन्तपर्यन्तचर्या पर्यायवेधसे।
नरवेषाय शेषाय गुरवे परवेदिने॥

जय यतिकुलनाथ ! नाथादि वाचा सनाथागमान्तानु -
रोधामितागाध बोधावधान प्रधान
प्रथासूनमेधा समाधानमाधाय बाधावरोधौ
विधूयावधायाद्वयध्वान्तमध्वान्तरं
शुद्धमुद्धृत्य भास्वत्प्रभावं स्वभावं
विभाव्य त्रयी दिव्यधेनूदिता नव्य
गव्यायितव्यास सूत्राणि सन्मार्गमित्राणि
बुद्ध्वा दुरोध्वोद्धता बद्ध नाना विरुद्ध
प्रमाणप्रसिद्धापसिद्धान्त निर्धारणौ -
द्धत्यपद्धत्यनुच्छेद्य सद्यस्समिद्धाग्नि -
तप्तानि लुप्तानि मासन्निति प्रेक्ष्य
साक्षात् सरोजाक्ष वीक्षामृतस्यन्दिबिन्दू -
पसंदानितामन्द सन्दर्भ गर्भस्फुरद्
यामुनेय प्रबन्धानुसन्धान सञ्जात
शीतानिलाव्रातजातेन गीतेन
सर्वावगीतेन चैतानि शीतानि
कृत्वा विदित्वा निराबाध बोधायनीया -
वबोधानुरोधोर्जितोदर्कसंचारणो -
दश्चिदा तं च नोद्यत् घनीभावभव्यानि

संभाव्य धन्यायित न्यायसन्धान
मन्थानदण्डेन तण्डोपतण्डोत्पतत्
पूर्वमीमांसकन्यायरज्जुप्रकाण्डेन
निर्मथ्य निर्माण धर्मोग्रकर्मावली
मर्मनिर्मूलनैकप्रधानं
सदानन्दधानैकतानापदानं
बुधानन्दधूनां सुधासूनवाचां
निदानं प्रतीचां विधानं दधानं
मुदानल्पजल्पप्रधानर्ध माया
कथानर्मनिर्मुक्त युक्तावधानं
च भाष्याभिधानं कवीन द्विषत् सर्प -
वीनं नवीनं च हैय्यङ्गवीनं
समुद्धृत्य दीनाप्रवीनार्भकेभ्यः
स्फुरद् गर्भकेभ्यो वदाय प्रदाय
स्वदायानुभूत्या विभूत्या समृद्धान्
प्रवृद्धान् गुणज्ञानवृद्धान्
त्रिवृद्धामधाम प्रवेशाभियोग्यान्
सभाग्यान् विलोक्य त्रिलोक्यग्रपूजा -
मुपैषिव्यपैषि श्रितातूलवृत्त्या
निवृत्त्याध्वदृश्यानवश्यानु -
कंप्यानवस्याऽर्यकस्ते नमस्तेजसा ॥ **1** ॥

जन वृजिन हरात्मचर्यादुहाश्चर्यधुर्या
मदाचार्यपर्याय भूतात्महाभूतपुर्यासुरीकेशवा -
चार्यवर्यात् क्रमेणावतीर्य स्फुरद् ब्रह्मरक्षो
वरक्षोभणाक्षुद्र वीक्षाक्षणाध्यक्षिताधोक्षजा
क्षीण दाक्षिण्य दीक्षा भवत्प्राभव प्रक्रिया

बोभुवद्भि क्रिया धिक्रिया वेदि दुर्वादि दर्वीकरा
खर्वगर्वादि निर्वापणं सर्वतः कुर्वता
खर्वितारम्भ जम्भद्विषाध्वस्त दुस्तार्किका -
शेषदोषा चरा लभ्य तत्वोमृतोद्धार
सिद्धात्मसत्वेन शुद्धत्रयीवाङ्मयेन
स्मरद्विस्मयेन स्फुरद्विस्मयेन प्रहीण -
स्मयेन त्वयासौ सुकीर्तिप्रियेणोपयात
श्रिया शौरिरेकान्तभक्तान् सुयुक्तान्
विविक्तान् विमुक्तौ नियुक्तान् अवत्यात्त
कृत्यो भवत्यात्मरक्षा भरन्यासदीक्षा
सरण्या धरण्यां शरण्यं गुरूणां वरेण्यं
कलापुण्यनैपुण्यपण्यं कृपापूर्ण
पूर्णार्यकारुण्यगण्यं भवोदीर्ण धन्या -
चलाध्वन्यखिन्नात्युदन्या प्रपारोप
दीव्यत् कृपालापमेतादृशं सर्वसम्प -
त्प्रपन्नात्मलीलादृशं मादृशोपक्रिया -
लाभवन्तं समृद्धै भवन्तं भवन्तं श्रियै
संश्रये ब्रह्मशक्रादि संस्तुत्य चक्रायुधो -
दार चक्राब्जदान क्रिया गौरवोदारता
भारती हस्त विन्यस्त युष्मद् वचः स्तोम
विस्मापिताशीतलक्ष्म्यार्द्र काशीतलाध्व
प्रकाशीकृत प्राभवां वैभवोदीर्णगोष्ठी
परीपूर्णगोष्ठी सदारम्य चारम्य गीतार्थ
पारम्य दित्सा व्यपेक्षां भवद्दिव्य
वीक्षामुदीक्षामहे धीमहे ब्रूमहे
त्वद्गिरां माधुरीं माधुरीणां सुधाया

धरायां बुधानां वृथायासहत्रीं त्रयी
शृङ्ग शृङ्गाटके ताटकेयोपमा रूप
माया समायात कौतुस्कुतव्रात तीव्रातपा
तन्द्र चन्द्रातप श्रेणि पाणिन्धमा
त्वत्प्रणामादि पौनः पुनीहि स्वयं मां
पुनीहि प्रमादं लुनीहीदमंहः पदं
हन्तुमन्तर्नियन्तुः नमन्तुर्हि ते ॥ 2 ॥

वृजिन तिमिरदोष दोषाकरे निर्मलाशेष भाषाकरे
श्रीकरे लोकरक्षैकदीक्षे कृपापूरसान्द्रे
यतीन्द्रे वसत्यंहसां रंहसा किं ह साध्यं
वृथा मा कृथा साध्वसं साध्वसंगेन
विज्ञानभंगेन दुर्मानदृग्गोचरो
माचरोदार सेवा कथास्वाद हेवारसान्याहि
मायाहि मायाहितान् क्वापि चेतो
मुधैवापचारान् गुरौ वा हरौ वा
कृथा माकृथा घोर कामक्रियाकारके
नारके मापतेः श्रीपतेः पादपङ्केरुहं
नन्ददिन्द्रादि वन्दारु मन्दार भूमीरुहं
सन्ततं चिन्तयानन्तया दुष्क्रिया पार
कूपायितोदार दारात्मजाराधनैकान्त
यूथान्त वेदान्त सिद्धान्त शुद्धान्तरङ्गान्
कृत श्रीतरङ्गान् कृपाजात रङ्गान्
अपाङ्गान् सतां साधु सम्पादया
पादयात्मानभिज्ञा भवग्राहमोह प्रदीपान्
अभिज्ञानदीपान् गुणान् नित्य
सत्योल्बणान् गौरवाचा विचारेण

दूरेण दुर्वार गर्वापसिद्धान्त सिद्धान्
जहीहि स्पृहाहेतुकं कौतुकं
जातुचित् ना क्वचित् विस्तृणीहि
श्रियं मा गृणीह्यप्रियं मा वृणीहि
प्रसादं गुरूणां गृहाण प्रमोदं दुहानां
असंजात सौख्यप्रहाणां असन्निग्रहाणां
दृढानुग्रहाणां गुणांभो निधीनां बुधानां
अधिष्ठाय गोष्ठीव्रते ष्ठीयमान स्वनिष्ठां
अनुष्ठाय भूयो विधेयं भवैषां समेषां
तदीयोज्ज्वलद् धृग् झरी वाग्झरी
जृम्भ दम्बोधिकोल्लोल माला समालोल
डोलाशता भील लीलानुवृद्धात्म
शीलानिकूलाच्युतालाप हेलादृगुन्मीलदालभ्य
वाल्लभ्य सौलभ्य लुभ्यद् गुणालक्ष्य
मोक्षोपदीक्षां सदा वृत्तिमावर्त -
मावर्तवद् वर्तमाना समानार्हतां याति
संसारिता दूरिताघव्रजं वारितारिव्रजं
पूरितात्मान्तरं भूरि तद्ब्रह्म सब्रह्मतां
यातिते तं भजे ॥ 3 ॥

नम इदमखिलार्तरक्षाभरन्यासदीक्षा
समुल्लास लक्ष्यप्रतापाय
शापायुधालापगोपायनोपायरूपाय
निर्धूततापाय विध्वस्तपापाय
नित्याभिरूपाय सत्याभिलापाय
निर्बाधविज्ञानदीपाय सर्वाप्रकम्प्यानु -
कम्पानदीपाय बिभ्यत्प्रतीपाय

शोशुभ्यमानत्रिदण्डाय निर्भेद
वादोक्ति निर्बंधना खण्डदन्डाय
मानोक्तिकाण्डप्रचण्डाय शुष्यद् वितण्डाय
भाषा विभाषायमाण प्रचाराय
दोषातिदूराय शेषावताराय
तारायितोदार हारा मराहार
नीहार धारा सुधापूर
सत्पूर कर्पूरवाणी भवानीश वीणाधर
ज्ञानिकाशप्रतीकाश कीर्तिप्रकाशाय
कारागृह प्रायकायाद्यभिप्राय
माया समायात संसार किंसारताकारि
कंसारि नित्य प्रशंसावतंसात्म
वाचाविचाराय दिव्योपगीताय
भव्योपनीताय काषायचेलाय
तोष्यैकशीलाय सम्पूर्ण पूरादि -
मोदीर्ण कर्णामृत द्राविडग्रन्थ -
सौगन्ध्य नादिंधमा मन्द वाचा सदा
चारु मोचामद प्राणित प्राणभृत् -
श्रेणि निश्रेणिका हृद्यगद्यत्रयोद्यान
पद्या चरत् संशुकीभूत पीतांशुकाय
स्फुरत् प्रान्तपाळी भवत् पादपाळी
चलत् सूनपाळी गळन्नव्यधूळी
सवन्चन्मधूळी मिळद् भृङ्गकेळी
शुकोद्यत् प्रतोळी वृतोद्यानकेळी
समायात चोळी कचाभ्राङ्गपाळी
दिदृक्षाकराळी कृतां चन्मराळी

विवक्षानिचोळी कृतानङ्गपाळी
कनत्तुङ्ग नाळीक वल्ली समालीढ
हल्लीसकप्रायसह्यात्मजाभङ्ग
रङ्गत्तरङ्गान्तरङ्ग स्फुरत्रङ्गभूमी
वसद् रङ्गनाथप्रियापाङ्ग
सम्फुल्लसल्लापनिर्लेप
साश्चर्यचर्याविलासाय
दासानुदासोल्लसन्मानिवास
प्रसाद प्रचारात्मविद्या निवेशाय
तस्मै यतीशाय ते श्रीमते धीमते ॥ **4** ॥

इति श्रीमता वेङ्कटेशेन क्लृप्तं
    यतीशानुगद्यं कृतीशानहृद्यं।
भवाब्धौ लुठन्तोपि नित्यं पठन्तः
    श्रयन्ते बुधास्तत्पदं सम्पदं च ॥

॥ इति श्री यतिराजदण्डकं समाप्तम् ॥